# राष्ट्रियसंस्कृतविश्वविद्यालयःतिरुपतिः ,

## विशिष्टाचार्यप्रवेशपरीक्षा -2020

## प्रश्नपत्रम्

**विषयः – हस्तलेखशास्त्रं प्राचीनलिपिशास्त्रं च        पूर्णाङ्काः -100**

1 शिक्षाक्षेत्रे अनुसन्धानस्य मुख्यं लक्ष्यं किं स्यात् ?

A व्यक्तेः सामाजिकदक्षताबृंहणम्

B व्यक्तेः वृत्तिप्राप्तियोग्यताविकासः

C व्यक्तेः वैयक्तिकस्वार्थपोषणम्

D व्यक्तिमुत्तमशिक्षकरूपेण प्रतिष्ठापनम्

2 "परिशीलनम्" इत्यस्य सम्बन्धः अनेन भवति --

A बहूनां शास्त्राणाम् अध्ययनम्

B एकस्य शास्त्रस्याध्ययनम्

C कस्यापि शास्त्रस्याध्ययनं विना मतोल्लेखः

D साक्षात्कारपद्धत्या विषयज्ञानम्

3 अनुसन्धानशीर्षकं कथं स्यात् ?

A पाण्डित्यबोधकम्    B केवलं स्वाभिरुचिमूलकम्

C समस्यामूलकम्    D समस्यारहितम्

4 संस्कृतवाङ्मये पुराणानि प्रामुख्येन कीदृशमनुसन्धानं सूचयन्ति ? A ऐतिहासिकम् B दार्शनिकम् C संख्यात्मकम् D प्रायोगिकम्

5 अनुसन्धाने सम्बन्धसाहित्याध्ययनस्य का आवश्यकता ? A स्वीकृतसमस्यायाः पुष्टिकरणार्थम् B स्वीकृतसमस्यायाः विश्लेषणार्थम् C स्वीकृतसमस्यायाः निवारणार्थम् D एतत्सर्वम्

6 मीमांसादर्शनाधारेण प्रबन्धाधिकरणं कतिप्रकारकम् ? A पञ्च B षट् C सप्त D अष्टौ

7 संशोधकस्य अयं गुणः भवेत् -- A भाषादक्षता B विषयदक्षता C शोधकार्ये अभिरुचिः D त्रयमपि

8 अनुसन्धानमेतस्याधारेण भवति -- A वैज्ञानिकविधेः B विज्ञानस्य C प्रयोगस्य D सामान्यनियमानाम्

9 अनुसन्धानविषयचयने एतत् अपेक्षितम् --- A अभिरुचिः B योग्यता C सामग्रीणामुपलब्धिः D त्रयमपि

10 अभिलेखाः इति सामग्रीसङ्कलनस्य इदं स्रोतः -- A प्राथमिकम् B माध्यमिकम् C आनुषङ्गिकम् D त्रयमपि

11 BORI इति मातृकागारस्य सम्पूर्णं स्वरूपमिदम् -- A Bharat Oriental Research Institution B Bhandarkar Oriental Research Institution C Bhagat Singh Organic Research Institution D Bhavan's Oriental Register Institution

12 अयम् अनुसन्धानस्य प्रकारो नास्ति - A सर्वेक्षणम् B तुलनात्मकम् C समस्यामूलकम् D न्यादर्शः

13 शोधः इति शब्दः शुध्-धातोः केन प्रत्ययेन निष्पन्नः ? A अच् B अण् C घञ् D एतेषु किमपि न

14 तात्कालिकीं समस्यां समाधातुं तत्कालमेव समुपलब्धेषु तथ्येषु यः शोधः विधीयते, सः कीदृशः ? A मौलिकः B व्यावहारिकः C क्रियात्मकः D एतेषु कोऽपि न

15 शोधकर्तुः अध्ययनपरिसरमाश्रित्य विषयनिर्वाचने कः सिद्धान्तः ? A अभिरुचिसिद्धान्तः B अध्ययनदक्षतासिद्धान्तः C योग्यनिर्देशनसिद्धान्तः D एतेषु कोऽपि न

16 अनुसन्धानविषयचयनप्रक्रियायां शोधपरिसरः कीदृशः भवेत् ? A असीमितः B सीमितः C सङ्कुचितः D एतेषु कोऽपि न

17 अनालोचितविषयेषु समुचितविषयनिर्वाचने कः सिद्धान्तः ? A
विषयसूचीसिद्धान्तः B अध्ययनक्षमतासिद्धान्तः C
तथ्यसंग्रहसिद्धान्तः D एतेषु कोऽपि न

18 सामग्रीसङ्कलने पत्रिकाः कीदृशानि स्रोतांसि ? A आनुषङ्गिकस्रोतांसि
B प्राथमिकस्रोतांसि C उभयमपि D न किमपि

19 पूर्वलिखितस्य जीर्णग्रन्धस्य पाठस्य संशोधनं कीदृशम् अनुसन्धानम् ? A
वर्णनात्मकम् B सम्पादनात्मकं विमर्शात्मकं वा C क्षेत्रीयम् D
ऐतिहासिकम्

20 अनुसन्धानम् एवं भवेत् -- A वस्तुनिष्ठम् B प्रामाणिकम् C
विश्वसनीयम् D त्रयमपि

21 Palaeography" इत्यस्य कोऽर्थः ? A प्राचीनमातृकाविज्ञानम् B
प्राचीनहस्तलेखविज्ञानम् C प्राचीनप्रत्नतत्त्वविज्ञानम् D
प्राचीनलेखनसामग्रीविज्ञानम्

22 भारतीयप्राचीनलिपिषु कस्याः नाम सर्वादौ आगच्छति ? A शारदालिपेः B
ब्राह्मीलिपेः C खरोष्ठीलिपेः D नन्दीनागरीलिपेः

23 ललितविस्तरे कतिसंख्याकाः लिपयः उद्धृताः ? A पञ्चाशत् B
चतुष्षष्टि C एकविंशतिः D द्व्यशीतिः

24 ब्राह्मीलिपेः शिलालेखाः कस्य राज्ञः समकालिकाः मन्यन्ते ? A धननन्दस्य
B कनिष्कस्य C प्रथमराजराजस्य D अशोकस्य

25 भारतवर्षे प्राचीनलिपीनां विधिबद्धतयाऽध्ययनं कुत्र प्राचलत् ? A
एसिआटिक् सोसाइटी, कोतकाता B सिन्धियाग्रन्थालयः, उज्जैन् C
भण्डारकरप्राच्यविद्याकेन्द्रम्, पुने D प्राच्यविद्यागवेषणाकेन्द्रं तथा
मातृकागारः, तिरुवन्तपुरम्

26 "Inscription of Ashok" इति ग्रन्थं कः प्रणीतवान् ? A हुएन्त्साङ्ग् B
अलवेरुणी C कनिङ्गहम् D म्याक्समूलर्

27 Edward Thomas मतानुसारेण ब्राह्मीलिपिः एतेषामासीत् --- A मौर्याणाम्
B आर्याणाम् C द्रमिडानाम् D आंग्लानाम्

28 साञ्चीशिलालेखः कस्य राज्ञः समकालिकः मन्यते ? A खारवेलस्य B
विष्णुगुप्तद्वितीयस्य C चन्द्रमगुप्तद्वितीयस्य D विक्रमादित्यस्य

29 खरोष्ठीलिपिः भारतस्य कस्मिन् भागे अधिकतया प्राप्यते ? A उत्तरपश्चिमभागे
B दक्षिणभागे C पूर्वभागे D दक्षिणपश्चिमभागे

30 अधोलिखितेषु कुत्र खरोष्ठीलिपेः शिलालेखाः प्राप्यन्ते ? A पाकिस्ताने B
कश्मीरेC बलुचीस्थाने D थाइलाण्डदेशे

31 वेदेषु अष्टविकृतिपाठानां का आवश्यकता ?A वैदिकसाहित्यस्य आयुगं
शुद्धतया संरक्षणम् B वैदिकशब्दानां त्रुटिसंशोधनम् C वैदिकमन्त्रेषु
स्वरसम्पादनम् D वैदिकमन्त्राणां सरलतया व्याख्यानम्

32 लिपिशालायां गौतमबुद्धस्य अक्षराभ्यासाय गुरुः कः आसीत् ? A वैनतेयः
B विश्वामित्रः C सिद्धार्थः D रत्नवसुः

33 भारतीयप्राचीनलिपिगवेषकेषु कः जर्मानविद्वान् अधिकः परिचितः ? A
Johan Georg Buhler B Warren Hastings C Sir
William Jones D Lord Macaulay

34 अधोलिखितेषु “कर्मदण्डशिलालेखः” केन राज्ञा सम्बद्धः ? A
चन्द्रगुप्तमौर्येण B कुमारगुप्तप्रथमेन C अशोकेन D
विक्रमादित्येन

35 “प्राचीनलिपिमाला” इति ग्रन्थः हिन्दीभाषायां केन प्रणीतः ? A
G.H.Ojha B M.L.Wadekar C V.S.Suktankar D
V.Raghavan

36 साहित्यदर्पणस्य लक्ष्मीटीकया सह सम्पादनं कोऽकार्षात् ? A विद्यानाथः B
कृष्णमोहनः C लोकमणिदाहलः D त्रलोकनाथद्विवेदी

37 गीतगोविन्दस्य सर्वाङ्गसुन्दरीटीका केन विश्वविद्यालयेन प्रकाशिता ? A
लालबहादूरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयेन B

तिरुपतिराष्ट्रियसंस्कृतविश्वविद्यालयेन C
कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयेन D
श्रीजगन्नाथसंस्कृतिविश्वविद्यालयेन

38 भण्डारकरप्राच्यविद्यागवेषणाकेन्द्रपक्षतः कस्य ग्रन्थस्य महत्त्वपूर्णं सम्पादनं विहितम् ? A रामायणस्य B पञ्चतन्त्रस्य C महाभारतस्य D पद्मपुराणस्य

39 अभिज्ञानशाकुन्तलम् इति नाटकस्यांग्लानुवादः केन कृतः ? A माक्समूलरेण B बुहलरेण C सर् विलियम् जोन्सवर्येण D कनिङ्गहाममहोदयेन

40 "The Journal of the Asiatic Society of Bengal" इति शोधपत्रिका कदा प्रारब्धा ? A 1797 B 1839 C 1832 D 1869

41 "The Dept. of Archaeological Survey" इति संस्थायाः प्रथमाध्यक्षः कः आसीत् ? A J.F. Fleet B A. Cunningham C Charles Wilkins D Radhakant Sharma

42 "Watson Museum" इति मातृकागारः कुत्र वर्तते ? A राजकोटे B नवदेहल्याम् C माद्रासनगरे D ताञ्जावुरनगरे

43 अधोलिखितेषु कः सर्वादौ गुप्तशिलालेखेषु लिपीनामध्ययनं कृत्वा ज्ञातुं प्राभवत् ? A जेम्सप्रिन्सेप् B कनिङ्गहाम् C राधाकान्तशर्मा D कोलोनेल् वाट्सन्

44 हुएन्त्साङ्ग मतानुसारेण बौद्धत्रिपिटकानां लेखनं केषु सर्वादौ समभवत् ? A ताडपत्रेषु B भुर्जपत्रेषु C प्रस्तरेषुD कर्गजेषु

45 बडोदराप्राच्यविद्याकेन्द्रे अगुरुपत्रे (Aloe Bark) रचितः कः ग्रन्थः प्राप्यते ? A ब्रह्माण्डपुराणम् B ब्रह्मपुराणम् C ब्रह्मवैवर्तपुराणम् D भागवतपुराणम्

46 अधोलिखितेषु किं तालपत्रप्रकारत्वेन न स्वीक्रियते ? A खरतालम् B श्रीतालम् C रत्नतालम् D प्रथमद्वयम्

47 खरतालपत्राणि भारतस्य कस्मिन् राज्ये अधिकतया प्राप्यते ? A आन्ध्रप्रदेशे B गुजराते C हिमाचलप्रदेशे D उत्कले

48 जैनानाम् अध्ययनकेन्द्रं किमुच्यते ? A विहारः B गुरुकूलम् C पाठागारः D उपाश्रयः

49 "क्वचिद्विधवयैवोन्मुक्ततालपत्रया" इति पङ्क्तिः कुत्र लभ्यते ? A दशकुमारचरिते B शिवराजविजये C कादम्बर्याम् D स्वप्नवासवदत्तायाम्

50 "असन्निहितानि पुनर्लेखनसाधनानि" इति कुत्र उक्तम् ? A मेघदूते B रघुवंशे C अभिज्ञानशाकुन्तले D ऋतुसंहारे

51 असमराज्ये "साञ्चीपात" इति कस्य नाम ? A तालपत्रस्य B अगुरुपत्रस्य C भुर्जपत्रस्य D कार्पासवस्त्रस्य

52 राज्ञः चन्द्रस्य नाम कस्मिन् लौहस्तम्भे प्राप्यते ? A चारमीनारे B धारलौहस्तम्भे C कुतुबमीनारे D एतेषु कुत्रापि न

53 कार्पासलेखनवस्त्रस्योल्लेखः केन कृतः ? A अलवेरुणिना B नियार्कसेनेन C हुएन्त्साङ्गेन D कल्हणेन

54 बौद्धजातककथासु शिशूनां लेखनफलकं केन निर्मितमासीत् ? A काष्ठेन B लौहेन C मृदा D तालपत्रेण

55 प्राचीललेखनसामग्रीषु "नरकुल" इति शब्दः कया सह सम्बद्धः ? A लेखनकुम्प्या B लेखनपट्टिकया C लेखनमस्या D लेखनशलाकया

56 कायस्थलेखकस्य प्रमुखं कार्यं किमासीत् ? A शासनलेखनम् B ग्रन्थलेखनम् C धनायव्ययलेखनम् D राज्ञः पत्रलेखनम्

57 "Namami" इति संस्थायाः केन्द्रीयप्रतिनिधित्वं केन क्रियते ? A Indira Gandhi National Centre for Arts इत्यनेन B Government of Oriental Manuscript Library इत्यनेन C Bhandarkar Oriental Research Institute इत्यनेन D Royal Asiatic Society, Kolkata इत्यनेन

58 Sayaji Rao Gaekwad Library कुत्र वर्तते ? A वडोदरायाम् B पुनेनगरे C वाराणस्याम् D नवदेहल्याम्

59 प्राचीनमातृकाणां बन्धनं कीदृशेन वस्त्रेणाच्छादनीयं भवेत् ? A श्वेतवस्त्रेण B रक्तवस्त्रेण C कृष्णवस्त्रेण D नीलवस्त्रेण

60 अधोलिखितेषु मातृकासंरक्षणाय कस्योपयोगः कीटनाशाय क्रियते ? A अश्वगन्धापत्रचूर्णस्य B कर्पूरस्य C हिङ्गुलस्य D एतेषां सर्वेषाम्

61 मातृकागुच्छस्य कस्मिन् भागे छिद्रं कुत्वा बन्धनं क्रियते ? A मध्यभागे B वामभागे C दक्षिणभागे D उभयपार्श्वे

62 मातृकाणां रक्षणं प्रकाश-ताप-धूलि-नमनीयताभ्यः कथं कर्तुं शक्यते ? A पेटिकासु श्वेतवस्त्राच्छादनपूर्वकं संस्थाप्य B उन्मुक्तच्छायाहीनप्रकोष्ठे संस्थाप्य C शीततापनियन्त्रिताबद्धप्रकोष्ठे संस्थाप्य D सूर्यकिरणे संस्थाप्य

63 अधोलिखितेषु किं पत्रं मातृकाणां जैविकाक्रमणात् रक्षति ? A बिल्वपत्रम् B कदलीपत्रम् C अञ्जीरपत्रम् D निम्बपत्रम्

64 "कृतिरक्षणम्" इति षाण्मासिकी पत्रिका कया संस्थया प्रकाश्यते ? A National Manuscript Mission, New Delhi B Central Institute of Buddhist Studies, Leh C Saraswati Mahal Library, Tanjavur D Odisha State Museum, Bhubaneswar

65 National Manuscript Mission, New Delhi इति संस्था कदा प्रतिष्ठापिता ? A 1956 A.D. B 2003 A.D C 2002 A.D. D 1987 A.D.

66 संस्कृतवर्णमालायां कत्यक्षराणि वर्तन्ते ? A पञ्चाशत् B षष्टिः C चतुष्षष्टिः D सप्तचत्वारिंशत्

67 चवर्णस्योच्चारणस्थानं किम् ? A कण्ठः B तालुः C मूर्धा D दन्तः

68 अधोलिखितेषु कः वर्णः दन्तौष्ठस्थानीयः ? A ह-वर्णः B व-वर्णः
C त-वर्णः D प-वर्णः

69 वर्णोच्चारणसन्दर्भे ईषत्स्पृष्टवर्णः कः ? A त-वर्णः B ह-वर्णः
C य-वर्णः D स्वरवर्णः

70 वेदमन्त्रसंरक्षणार्थमेतेषां महत्त्वं वरीवर्ति – A पुराणानाम् B
वेदाङ्गानाम् C ब्राह्मणानाम् D आरण्यकग्रन्थानाम्

71 वेदविकृतिबोधकः "विकृतिवल्ली" इति ग्रन्थः केन विरचितः ? A यास्केन
B पतञ्जलिना C व्याडिना D भर्तृहरिणा

72 "अष्टविकृतिविवृतिः" इति ग्रन्थस्य प्रणेता कः ? A अनन्ताचार्यः B
मधुसूदनमस्करी C सायणः D वेङ्कटाध्वरी

73 वेदानां पदपाठस्य प्रवक्ता कः ? A व्याडिःB रावणः C
स्वयं भगवान् D मनुः

74 बाभ्रव्यर्षिः वेदानां कीदृशं पाठमवोचत् ? A जटापाठम् B
शिखापाठम् C क्रमपाठम् D पदपाठम्

75 वेदानां प्रकृतिपाठेष्वयमन्तर्भवति ---A जटापाठः B ध्वजपाठः C
घनपाठः D क्रमपाठः

76 के पङ्क्तिपावना इत्युच्यन्ते ?A विकृतिपाठकाः B क्रमपाठकाः C
भाष्यपाठकाः D संहितापाठकाः

77 सामवेदस्य कौथुमशाखायाः पदपाठद्रष्टा कः ? A शाकल्यः B
आत्रेयः C गार्ग्यः D गृत्समदः

78 अधोलिखितेष्वयं विकृतिपाठेषु अन्तर्भवति --- A रथपाठः B
पदपाठः C संहितापाठः D क्रमपाठः

79 "विष्णोः, कर्माणि विष्णोः, विष्णोः कर्माणि" इत्यत्र कः पाठः ? A पदपाठः
B जटापाठः C शिखापाठः D ध्वजपाठः

80 "पदप्रकृतिः संहिता" इति केनोक्तम् ? A यास्केन B सायणेन
C दयानन्दंन D बास्कलेन

81 कस्यां मातृकाशालायाम् आगमसम्बद्धाः मातृकाः अधिकतया प्राप्यन्ते ? A प्राच्यविद्याकेन्द्रम्, वडोदरा B श्रीवेङ्कटेश्वरप्राच्यविद्याकेन्द्रम्, तिरुपतिः C रयाल् एसिआटिक् सोसाइटि, मुम्बै D फ्रैंच् केन्द्रम् , पण्डिचेरी

82 कुपेरीमहोदयस्य मतानुसारेण ब्राह्मीलिपिः कुतः समुद्भूता ?A चीनीलिपितः B अरबीलिपितः C सिन्धुलिपितः D ग्रीक्-लिपितः

83 भारतीयभाषापरिवारे अधोलिखितेषु का लिपिः दक्षिणभारते विकसिता ? A सिद्धम्-लिपिः B शारदालिपिः C देवनागरीलिपिः D कदम्बलिपिः

84 मलयालमलिपेः उद्भवः कस्याः समभूत् ? A शारदालिपेः B तमिलब्राह्मीलिपेः C पल्लवग्रन्थलिपेः D गुप्तलिपेः

85 अधोलिखितासु लिपिषु का शारदालिपिप्रसूता ? A गुरुमुखी B नागरी C ओडिआ D गुजराती

86 का लिपिः सिद्धमात्रिकनाम्ना प्रसिद्धा ? A ब्राह्मीलिपिः B शारदालिपिः C सिन्धुलिपिः D खरोष्ठीलिपिः

87 "मणिप्रवालम" इत्यस्य टीकालेखस्य कृते का लिपिः प्रयुक्ताऽऽसीत् ? A ग्रन्थलिपेः B खरोष्ठीलिपेः C शारदालिपेः D नागरीलिपेः

88 तिगलारीलिपेः समानता कया आधुनिकलिप्या साकं वर्तते ? A तमिललिप्या B देवनागरीलिप्या C मलयालमलिप्या D कलिङ्गलिप्या

89 नाकरिष्यद्यदि ब्रह्मा लिखितं चक्षुरुत्तमम् । तत्रेयमस्य लोकस्य नाभविष्यच्छुभा गतिः ॥ इति कुत्रोक्तम् ? A विष्णुस्मृतौ B नारदस्मृतौ C मनुस्मृतौ D वसिष्ठस्मृतौ

90 ब्राह्मीलिपेः "बंभलिपिः" इति नाम कस्मिन् ग्रन्थे प्राप्यते ? A समवायाङ्गसूत्रे B त्रिपिटके C ललितविस्तरे D राजतरङ्गिण्याम्

91 नेवारीलिपिः कस्याः लिपेः विकसितरूपा अस्ति ? A शारदालिपेः B ग्रन्थलिपेः C कदम्बलिपेः D मैथिलीलिपेः

92 इण्डोनेशियादेशस्य जावाईलिपिः कस्याः भारतीयलिपेः प्रसृता ? A
तिगलारीलिपेः B नेवारीलिपेः C ग्रन्थलिपेः D मोडीलिपेः
93 का लिपिः पञ्चदशशतके नेपालराज्यस्य प्राशासनिकलिपित्वेन उपयुक्ताऽऽसीत् ?
A मोडीलिपिः B सिद्धम्-लिपिः C शारदालिपिः D
नेवारीलिपिः
94 के सह्याद्रौ ग्रन्थलेखनार्थं तिगलारीलिपेः उपयोगमकार्षुः ? A शिवलीपण्डिताः
B काश्मीरपण्डिताः C तैलङ्गब्राह्मणाः D
कृष्णदेवरायसभापण्डिताः
95 दक्षिणभारते विजयनगरसाम्राज्ये का आधिकारकलिपिः आसीत् ? A
नेवारीलिपिः B नन्दीनागरीलिपिः C शारदालिपिः D
ब्राह्मीलिपिः
96 "New Catalogus Catalogorum" इति मातृकाविवरणग्रन्थस्य मुख्यसम्पादकः
कः ? A वी.राघवन् B कनिङ्गहाम् C वुहलर् D एम्.एल्.वादेकर्
97 NCC इति मातृकाविवरणग्रन्थस्य प्रकाशनसंस्था का ? A
दिल्लीविश्वविद्यालयः B माद्रासविश्वविद्यालयः C
श्रीवेङ्कटेश्वरविश्वविद्यालयः D लखनऊविश्वविद्यालयः
98 ताञ्जावूरमातृकागारस्य मातृकाविवरणग्रन्थस्य ग्रन्थकारः कः ? A
सुब्रह्मण्यशास्त्री पि.पि. B सूक्तङ्करः C हरदत्तशर्मा D
वी.राघवन्
99 ब्राह्मीलिपेः सर्वप्राचीनमातृका कुत्र प्राप्यते ? A रामपुरराजाग्रन्थालये B
सिण्डिआ-प्राच्यविद्यागवेषणाकेन्द्रे C भण्डारकरप्राच्यविद्याकेन्द्रे D
औडिशाराज्यसंग्रहालये
100 गीतगोविन्दस्य सर्वाधिकमातृकासंग्रहः कुत्र वर्तते ? A सलारजंगसंग्रहालये B
तामिलनाडुसर्वकारीयसंग्रहालये C सम्बलपुरविश्वविद्यालये D
औडिशाराज्यसंग्रहालये

ANSWER KEY

M.Phil – Manucriptology and Paleography

| *Q. No* | **KEY** | *Q. No* | **KEY** | *Q. No* | **KEY** | *Q. No* | **KEY** |
|---|---|---|---|---|---|---|---|
| 1 | **D** | 26 | **C** | 51 | **B** | 76 | **A** |
| 2 | **A** | 27 | **C** | 52 | **C** | 77 | **C** |
| 3 | **C** | 28 | **C** | 53 | **B** | 78 | **A** |
| 4 | **A** | 29 | **A** | 54 | **A** | 79 | **B** |
| 5 | **D** | 30 | **C** | 55 | **D** | 80 | **A** |
| 6 | **A** | 31 | **A** | 56 | **C** | 81 | **D** |
| 7 | **D** | 32 | **B** | 57 | **A** | 82 | **A** |
| 8 | **A** | 33 | **A** | 58 | **C** | 83 | **D** |
| 9 | **D** | 34 | **B** | 59 | **B** | 84 | **C** |
| 10 | **A** | 35 | **A** | 60 | **D** | 85 | **A** |
| 11 | **B** | 36 | **B** | 61 | **A** | 86 | **B** |
| 12 | **D** | 37 | **B** | 62 | **C** | 87 | **A** |
| 13 | **C** | 38 | **C** | 63 | **D** | 88 | **C** |
| 14 | **C** | 39 | **C** | 64 | **A** | 89 | **B** |
| 15 | **B** | 40 | **C** | 65 | **A** | 90 | **A** |
| 16 | **B** | 41 | **B** | 66 | **C** | 91 | **A** |
| 17 | **A** | 42 | **A** | 67 | **B** | 92 | **C** |
| 18 | **A** | 43 | **A** | 68 | **B** | 93 | **D** |
| 19 | **B** | 44 | **A** | 69 | **C** | 94 | **A** |
| 20 | **D** | 45 | **C** | 70 | **B** | 95 | **B** |
| 21 | **B** | 46 | **C** | 71 | **C** | 96 | **A** |
| 22 | **B** | 47 | **B** | 72 | **B** | 97 | **B** |
| 23 | **B** | 48 | **D** | 73 | **B** | 98 | **A** |
| 24 | **D** | 49 | **C** | 74 | **C** | 99 | **B** |
| 25 | **A** | 50 | **C** | 75 | **D** | 100 | **D** |